जीत्”भा०अ० ६५अ० । “जिगाय तस्य हर्त्तारं स रामः सार्वलौकिकः” भट्टिः “गर्जितानन्तरां दृष्टिं सौभाग्येन जिगाय सा” कुमा० । “जीयात् पण्डितगर्वपर्वतपविः श्रीबोपदेवकविः” मुग्धबो० अस्य तदन्तस्थाने तिवन्ती । जयति जयन्ति । “जयति जयति देवः” नाटकेषु बहुस्थाने कञ्चुकाद्युक्तिः । “नवरसरुचिरां निर्मितिमादधती भारती कवेर्जयति” काव्यप्र० । जयस्य सर्वेभ्य उत्कर्षस्तेन स्वापेक्षयाप्युत्कर्षबोधनात् तस्य नमस्कारव्यञ्जकता यथाह काव्यप्र० “जयत्यर्थेन च नमस्कार आक्षिप्यते इति तार्मास प्रणत इति” । अभिभवपूर्वकग्रहणे अयं द्विक० । दुह्याच् पचदण्ड् रुधि प्रच्छि चिञ् शासु जिमन्थ् मुषाम् । कर्मयुक् स्यादकथितन्तथा स्यान्नीहृकृष्वहाम्”इत्युक्तेः । शतं जयति देवदत्तम्”सि० कौ० “इन्द्रं वाजं जापयत” यजु०८।११।“यदि त्वध्वर्यव आजिं जापयेयुः” आश्व० ८।८ ।“इमाञ्च पृथिवीं क्रत्स्नामेकाह्ना स व्यजीजपत्”भा०द्रो०६२अ० स्वार्थे णिच् । व्यजीजयत् इति पाठे गुणभाव आर्षः। “गतिं जिगीषतः पादौ रुरुहातेऽतिकामिकाम्” भाग०२।१०।२५ ।“अगाहताष्टादशतां जिगीषया” नैष० । जेगीयते । कर्मणि अजीयत अजायि । “प्रागजीयत घृणा ततो मही”रघुः ।

अति+अतिशयेन जये “विराडियं सुप्रजा अत्यजैषीत्” अथ० १४।२।७४ । [धैर्यं तस्य गच्छतः” भट्टिः

वि+अति परस्परजये आत्म० । “व्यतिजिग्ये समुद्रोऽपि न

अधि+आधिक्येन जये“सपत्नांश्चाधिजीयास्म” भट्टिः ।

अनु+अनुरूपजये पश्चाज्जये च । “कौशल्योऽन्वजयत् मद्दीम्” भा० शा० ३१२४ अ० ।

अभि+आभिमुख्येन जये । “ते चान्द्रमसमेव लोकमभिजयन्ति” प्रश्नो पु० १अधिगमे च “वेदश्रुतिभिराख्यानैरर्थानभिजिगीषति” भा० शा० ८४६५ ।

अव+अधरीकृत्य जये । “शरैर्विध्यस्य तांश्चैरानवजित्य च तद्धनम्” भा० आ० ७७६ । “अवजित्य सुराश्चीणं धनं चादाय सर्वशः” भा०वि०३३अ० ।

परा+पराक्रमपूर्वकजये आत्म० । पराजयते । “खं पराजयमानोऽसावुत्त्वा पवनात्मजम्”भट्टिः। “पराजितेनापि कृतौ हरस्य”कुमा०। ग्लानौ अक० तत्र “पराजेरसोढः” पा० सहार्थस्यापादानता । “अध्ययनात् पराजयते ग्लायतीत्यर्थः सि० कौ० “तां पराजयमानां स प्रीतेः रक्षां दशाननात्” भट्टिः ।

प्रति+प्रतिरूपजये । “कञ्चाविकं मायया प्रत्यजैषीत्” भा० द्रो० १२५७श्लो० । “वयं प्रतिजिगीषन्तस्तत्र तान् समभिद्रुताः”४३७६ श्लो० ।

वि+विशेषेण जये आत्म० विजयते । “येन देवान् मनुष्यांश्च पार्थो विजयते मृधे” भा० वि०१३४५श्लो० ।“जगादाद्विविजेषीष्ठाः । “दैत्यं कुलं विजिग्ये” भट्टिः ।

जि त्रि०ज्या+वा०कि । १जयशीले २पिशाचे पु०एकाक्षरको०।

जिकन पु० स्मृतिनिबन्धकारके विद्वद्भेदे ।

जिगत्नु पु० गम–क्त्नु सन्वच्च । प्राणवायौ उज्ज्वल०द० ।

जिगर्त्ति पु०गृ–बा०ति द्वित्वञ्च । आच्छादके । “जिगर्त्तिमिन्द्रो अपजर्गुराणः”ऋ० ५।२९।४ ‘“जिगर्त्तिं गरलमाच्छादयन्तम्” भा० ।

जिगीषा स्त्री जि–सन् भावे अ । १जयेच्छायां, २प्रकर्षे, ३उद्यमे च मेदि० । “वैवस्वतजिगीषया”रघुः । “अगाहताष्टादशतां जिगीषया” नैष० ।

जिघत्नु पु० जिघांसु+पृषो० । जिघांसौ । “यो नः सनुत्य उत वा जिघत्नुः” ऋ०२।३०।९।“जिघत्नुर्जिघांसुः”भा०।

जिघत्सा स्त्री अत्तुमिच्छा अद–सन् घसादेशः भावे अ । १भोजनेच्छायां २क्षुधायां हेमच०। [अमरः ।

जिघत्सु त्रि० अत्तुमिच्छति अद–सन्–घसादेशे उ । क्षुधिते

जिघांसु त्रि०हन–सन्–उ । हननेच्छौ “प्रशान्तचेष्टं हरिणं जिघांसुः” भा० २रिपौ पु० हेमच० ।

जिघृक्षा स्त्री ग्रह–सन् भावे अ । ग्रहणेच्छायां “पटुरपि प्रियकण्ठजिघृक्षया” रघुः ।

जिघ्र त्रि० घ्रा–कर्त्तरि श जिघ्रादेशः । घ्राणकर्त्तरि “स्वामी निश्वसितेऽप्यसूयति मनोजिघ्रः सपत्नीजनः” सा० द० “अजिघ्रैः पुष्पगन्धानां पतङ्गैर्न्नपिता वयम्”भट्टिः ।

जिङ्गिनी स्त्री जिगि–गतौ णिनि ।(झिङ्गी)लतायां भावप्र० “जिङ्गिनी मधुरोष्णा च कषाया योनिशोधिनी । कटुका व्रणहृद्रोगवातातीसारहृत् पटुः”भावप्र० ।[अमरः ।

जिङ्गी स्त्री जिगि–गतौ अच् गौरा० ङीष् । मञ्जिष्ठायाम्

जिज्ञासा स्त्री ज्ञा–भावे अ ।१ज्ञातुमिच्छायां२तदर्थविचारे च । “अथातो धर्म्मजिज्ञासा”जै०सू०।“अथातो ब्रह्मजिज्ञासा” शा०सू० । उभयत्र विचारार्थकताकरे दृष्टा “दुःखत्रयाभिघातात् जिज्ञासा तदपघातके हेतौ”सां०का० ।

जिज्ञासु त्रि० ज्ञातुमिच्छुः ज्ञा–सन्–उ । १ज्ञातुमिच्छौ २मुमुक्षौ च “चतुर्विधा भजन्ते माम्–“आर्त्तो जिज्ञासुरर्थार्थी ज्ञानी च भरतर्षभ !” गीता ।